दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-75

1

08.01.2024 सोमवासरः वि.सं. २०८० पौषकृष्णः द्वादशी पौषः 24 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

पुलिसनियुक्तौ प्रथमवारं डोपपरीक्षणम्; नियुक्तिनियमस्य प्रारूपः निर्गतः, १५ दिवसेषु आक्षेपाः याचिताः 2




'भूल भूलैया ३' चलचित्रे कदाचिद् विद्या बालनः दृश्यते 3




लङ्काकाण्डम्! (सप्तपञ्चाशत्तमः सर्गः) राघवस्य समीपे जानक्याः आनयनम् 4



## बांग्लादेशे पुनः शेखहसीना सर्वकारः, पञ्चबारं भविष्यति देशस्य प्रधानमन्त्री



**हिमसंस्कृतवार्ताः।** बांग्लादेशे प्राप्तवार्तानुसारं मतगणनायां शेखहसीनायाः दलः ३०० संसदीय-आसनेषु २२४ आसनेषु विजयं प्राप्तवान्। बंग्लादेशजातीयदलेन ४ आसानानि विजितानि, तत्रैव निर्दलीयेषु आसनेषु ६२ आसनानि विजितानि। वार्तालेखनपर्यन्तं द्व्यासनेषु गणना चलति स्म। शेखहसीना २००९ तमात् वर्षात् देशस्य प्रधानमन्त्रीं पदं धारयति। अस्मिन् कार्यकाले चयनिता भूत्वा सा क्रमशः पञ्चबारं देशस्य प्रधानमन्त्री भविष्यति। शेकहसीना स्वस्य संसदीय-आसनात् गोपालगंज-३ इत्यस्मात् २, ४९, ९६५ मतैः विजिता अस्ति।

## उत्तरी-गाजा-पट्टिकायां हमास इत्यस्य नियोजित-सरञ्जनायाः विनष्टाकार्यं सम्पूरितम्- इजराइलः



इजराइलदेशीयेन रक्षाबलेन प्रोदीरितं यत् अनेन उत्तरी-गाजा-पट्टिकायां हमास इत्यस्य नियोजित-सरञ्जनायाः विनष्टाकार्यं सम्पूरितम्। सेनायाः प्रवक्ता डैनियल-हगारी इत्येषः वार्ताहरान् संसूचितवान् यत् अधुना अस्मिन् क्षेत्रे केचन फलिस्तीन-आतंकवादिनः कार्यरताः सन्ति। असौ प्रावोचत् यत् इजराइलदेशने उत्तर-गाजा-पट्टिकायाम् अष्टसहस्रं आतंकवादिनः मारिताः। इजराइलदेशः सम्प्रति दक्षिण-मध्य-गाजा क्षेत्रयोः हमासेन स्थापितेषु केन्द्रेषु ध्यानं प्रददाति।

## राजस्थानराज्ये आरक्षि- महानिदेशकानाम् महानिरीक्षकाणाञ्च सम्मेलनम् जयपुरनगरे सम्पन्नम्



राजस्थानराज्ये त्रयोविंशत्यधिक- द्विसहस्रतम- वर्षस्य आरक्षि- महानिदेशकानाम् आरक्षि- महानिरीक्षकाणाञ्च अखिल- भारतीय- सम्मेलनम् जयपुरनगरे सम्पन्नम्। त्रि-दिवसात्मकं सम्मेलनमिदं जयपुरनगरस्य राजस्थान-अन्ताराष्ट्रिय- केन्द्र- समनुष्ठितम्। अवसरेऽस्मिन् प्रधानमन्त्री नरेन्द्रमोदी गृहमन्त्री अमितशाहः च सम्मेलनस्यास्य समापन- समारोहे सर्वेषु महत्त्वपूर्ण- सत्रेषु भागं अभजताम्। राष्ट्रिय- सुरक्षा- परामर्श दात्रा सह अनेके वरिष्ठाधिकारिणश्चापि उपस्थिताः आसन्। सम्मेलनेऽस्मिन् सांगणिकापराध- नियन्त्रणं आरक्षि- सेवासु प्रौद्योगिक्याः उपयोगः इत्यादयः विषयाः चर्चिताः।

## पाकिस्तानाधिकृते जम्मू-कश्मीरे आर्थिक-साहाय्यस्य प्रत्यवर्तनम् अथ मूल्यवृद्धिम् च आलक्ष्य विरोध- प्रदर्शनम्



पाकिस्तानाधिकृते जम्मू-कश्मीरे आर्थिक-साहाय्यस्य प्रत्यवर्तनम् अथ मूल्यवृद्धिम् च आलक्ष्य विरोध-प्रदर्शनम् एकादशे दिने अपि अनुवर्तते। विरोधप्रदर्शनानां नेतृत्व-कर्तृणां सङ्घटानानाम् अध्यर्थना अस्ति यत् प्रशासनं यावत् गोधूमस्य मूल्येषु अपचितिं नैव करिष्यति तावत् प्रदर्शनानि भविष्यन्ति। मूल्यवृद्धि-कारणेन जनमनस्सु असन्तोषः दृश्यते। अवधेयम् अस्ति यत् प्रतिदिनं प्रदर्शनकारिणां सङ्ख्या समेधमाना वर्तते।

## प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य त्रि-दिवसीय यात्रां प्रति यास्यति

प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातस्य त्रि-दिवसीय यात्रां प्रति यास्यति। ततः परं प्रधानमन्त्री मंगलवासरे गांधीनगरस्य महात्मा- मन्दिरे विश्व-नेतृभिस्साकं द्वैपाक्षिकीं वार्तां विधास्यति। सहैव, शीर्ष- वैश्विक- निगमानां मुख्य- कार्यकारि-अधिकारिभिः समं उपवेशनमपि करिष्यति। तस्मिन्नेव दिवसे असौ बाइब्रेंट- गुजरात- ग्लोबल-ट्रेड- शो इत्यस्यापि उद्घाटनं करिष्यति। तदनन्तरं बुधवासरे प्रधानमन्त्री बाइब्रेंन्ट- गुजरात- वैश्विक -सम्मेलनस्य चतुर्विंशत्यधिक- द्विसहस्र-तमवर्षस्य उद्घाटनं करिष्यति।

## द्विदिवसीय- यात्रार्थम् रक्षामन्त्री राजनाथसिंहः ब्रिटेन- राष्ट्रम् यास्यति

रक्षामन्त्री राजनाथसिंहः अद्य द्विदिवसीय- यात्रार्थं ब्रिटेन- राष्ट्रम् यास्यति। अस्मिन् अवधौ रक्षामन्त्री ब्रिटेन- रक्षामन्त्रिणा ग्रांट-शैप्पस इत्यमुना सह द्विपक्षीय- वार्तां करिष्यति। रक्षा- मन्त्रालयेन उक्तं यत् द्वयोः मन्त्रिणोः मध्ये रक्षा-सुरक्षा अथ औद्योगिक- सहयोगानां विषये व्यापक- चर्चायाः आशा विद्यते। सिंहः तत्रत्येन प्रधानामन्त्रिणा ऋषि-सुनकेन विदेशमन्त्रिणा डेवि-कैमरून इत्यनेन च समं विचार-विमर्शं करिष्यतीति सम्भाव्यते।

## केन्द्रीय- महिला- बाल- विकासमन्त्री स्मृति-ईरानी द्विदिवसीय- यात्रायाम् सऊदी-अरब इति राष्ट्रं सम्प्राप्ता




केन्द्रीय- महिला- बाल- विकासमन्त्री अथ अल्प-सङ्ख्यक- कार्यमन्त्री च स्मृति-ईरानी द्विदिवसीय-यात्रायाम् सऊदी-अरब इति राष्ट्रं सम्प्राप्ता। विदेश-राज्य- संसदीय- कार्यमन्त्री वी. मुरलीधरनः अपि तया सह विद्यते। स्मृति-ईरानी जद्दाह-स्थले द्विपक्षीय-हजसन्धौ हस्ताक्षराणि विधातुं प्रस्थितस्य शिष्टमण्डलस्य नेतृत्वं विदधाति। स्मृति-ईरानी सऊदी-अरब- देशस्य हज- उमराह- मन्त्रिणा डॉ. तौफीक- बिन- फोजान-अल- रबियाह इत्यनेन सह द्विपक्षीयोपवेशनम् अपि करिष्यति। अत्रावसरे परस्पर- हित- विषयेषु अथ अस्मिन् वर्षे आयोक्ष्यमाण- हज- सम्बद्ध- विषयेषु विचार- विमर्शो भविष्यति। शिष्टमण्डलं तत्र भारतीय-व्यापार- समुदायेन भारतवासिभिश्च साकं मेलिष्यति। स्मृति-ईरानी अद्य सऊदी-अरब हज- उमराह-मन्त्रालय- द्वारा जद्दाह-क्षेत्रे आयोजयिष्यमाणस्य तृतीय- हज- उमराह- सम्मेलनस्य उद्घाटन-समारोहे अपि उपस्थास्यति। ईरानी वर्यायाः एषा यात्रा देश-द्वयस्य समेधमाननां सुदृढ-राजनयिक- सम्बन्धानाम् अथ समेधमानपरस्पर- सहयोगस्य च प्रतीकरूपा वर्तते।

## संस्कृतगीतम्

**त्वं काव्यधीः,अहन्ते रचनीया**
(Sanskrit Version Lyrics Of Hindi Film Song –
**तू शायर है मैं तेरी शायरी)**

त्वं काव्यधीः, अहन्ते रचनीया
(त्वं काव्यकृत्,/ त्वं रचको भोः,)
त्वं काव्यधीः, अहन्ते रचनीया
त्वं प्रीणयिता, अहन्ते प्रीणिता
त्वां मेलितुं वै ईप्सामि
त्वां मेलितुं वै ईप्सामि, ओ मे हि वल्लभ
त्वं काव्यधीः, अहन्ते रचनीया
त्वं प्रीणयिता, अहन्ते प्रीणिता -- (००)
भवतः रचनानि गीतानि च
स्मरणे मे आयान्ति हि
भवतः रचनानि गीतानि च
स्मरणे मे आयान्ति हि
अहं त्वां न विस्मापये तावत्
सखे यावदनु श्वसामीह
त्वया विना जीवनीया, ब्रूवे नो हि कदाऽहं
त्वया विना जीवनीया, ब्रूवे नो हि कदाऽहं
मया विना वीक्ष्य त्वां हि, जाने त्वयि हृत् मे कृतं
त्वं स्पन्दोऽसि, अहं ते प्राणा वै
त्वं काव्यधीः, अहं ते रचनीया ..... (०१)
स्वीयामनोदशां वद कथं
त्वां हि प्रेमचर ब्रूयामिह
स्वीयामनोदशां वद कथं
त्वां हि प्रेमचर ब्रूयामिह
कथं वदामि हे तुभ्यं
कियत्युन् मे भवति स्नेहः प्रिय
अधरे क्व हि नाम न ही
त्वात्कं विना मे कान्त
अधरे क्व हि नाम न ही
त्वात्कं विना मे कान्त
मे ही इह हृदि तावत् ते
हि मादो व्यच्छाययत्
त्वं मत्तोऽसि, अहन्ते प्रणयिनी
त्वं काव्यधीः, अहन्ते रचनीया .... (०२)

**रचयिता - डॉ. रुरुकुमारमहापात्रः (अध्यापकः)**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

## सुभाषितम्

**विचित्रे खलु संसारे**
**नास्ति किञ्चिन्निरर्थकम्।**
**अश्वश्चेद् धावने वीरः**
**भारस्य वहने खरः**

**भावार्थ- इस अद्भुत संसार में निश्चित ही कुछ भी अनुपयोगी नहीं है। घोड़ा यदि दौड़ने की कला में कुशल (योग्य) है, तो गधा भार ढोने में योग्य होता है।**

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# पुलिसनियुक्तौ प्रथमवारं डोपपरीक्षणम्;

## नियुक्तिनियमस्य प्रारूपः निर्गतः, १५ दिवसेषु आक्षेपाः याचिताः




> मादकद्रव्यस्य सेवनस्य अन्वेषणार्थं नियमेषु प्रावधानम्।
> नवीननियमेषु भूपरीक्षणसमयावधिः न्यूनीकृतः।
> लोकसेवा-आयोगं वा अन्या संस्था परीक्षां करिष्यति।
> पुलिसप्रशिक्षणानन्तरं कमाण्डो पाठ्यक्रमः क्रियते।

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशपुलिसनियुक्तिविषये नूतनं परिवर्तनं कृतमस्ति। अस्य कृते २०२१ तमस्य वर्षस्य अगस्तमासस्य ९ दिनाङ्कस्य पुलिसनियुक्तिनियमेषु परिवर्तनं कृत्वा नूतनाः नियमाः कार्यान्विताः सन्ति। नूतननियमानुसारं नियुक्तानां पुलिसकर्मचारिणां सामान्यप्रशिक्षणेन सह चतुर्मासानां कमाण्डोप्रशिक्षणं सफलतया उत्तीर्णं कर्तुं अनिवार्यं कृतम् अस्ति। गृहविभागेन पुलिसनियुक्तेः प्रारूपः निर्गतः अस्ति। पुलिसनियुक्तिनियमेषु कृतस्य परिवर्तनस्य विषये १५ दिवसेषु आक्षेपं दातुं कथितम् अस्ति। तदनन्तरं एव पुलिसनियुक्तेः प्रारुपः अन्तिमरूपेण निर्धारितः भविष्यति। पुलिसनियुक्तिप्रारूपे अन्तिमरूपं प्राप्तस्य अनन्तरं पुलिसनियुक्तिप्रक्रिया आरभ्यते। पुलिसविभागे आरक्षकनियुक्त्यर्थं पुलिसविभागः परीक्षां न करिष्यति। राज्यसर्वकारः लोकसेवा-आयोगेन वा अन्यया संस्थया वा आरक्षकनियुक्तिपरीक्षायाः प्रक्रियां सम्पन्नां करिष्यति। राज्यसर्वकारेण हिमाचलपुलिसस्य १२२६ आरक्षकपदानि पूरयितुं निर्णयः कृतः। पुलिसनियुक्तिनियमेषु संशोधनं कृत्वा महिलानाम् आरक्षणं ३० प्रतिशतं यावत् वर्धितम् अस्ति। हिमाचलपुलिसमध्ये १२२६ आरक्षकाः नियुक्ताः भवेयुः। एतेषु ८७७ पुरुषाः, २९२ महिला-आरक्षिकाः, ५७ चालकाः च सन्ति । पुलिसनियुक्तौ महिलानां आरक्षणसमवायः २५ प्रतिशतात् ३० प्रतिशतं यावत् वर्धितः अस्ति। पुलिसनियुक्तेः नूतननियमेषु शारीरिकपरीक्षायां १०० मीटरधावनं समावेशनं विहाय पुरुषाणां कृते १५०० मीटरधावनं पूर्णं कर्तुं समयः एकनिमेषं, महिलानां कृते ८०० मीटरधावनं अर्धनिमेषं न्यूनीकृतः अस्ति। एतदतिरिक्तं पुलिसनियुक्तौ शारीरिकदक्षतापरीक्षायै डोपपरीक्षणम् अनिवार्यं कृतम् अस्ति।

पुलिसारक्षकनियुक्त्यर्थं नवमासपर्यन्तं प्रशिक्षणं दीयते। प्रशिक्षणानन्तरं नवनियुक्तानां आरक्षकाणाम् विशेषं कमाण्डो-प्रशिक्षणं दीयते। पीटीसी- डरोहे चतुःसप्ताहस्य विशेषकमाण्डो प्रशिक्षणं भविष्यति। पूर्वं सामान्यप्रशिक्षणे ये उत्तमं प्रदर्शनं कुर्वन्ति तेषां कृते एव कमाण्डो प्रशिक्षणं दत्तम् आसीत् । गृहविभागेन हिमाचलप्रदेश-लोकसेवा-आयोगस्य माध्यमेन नियुक्तेः नूतनाः मानकाः निर्धारिताः। आरक्षकनियुक्त्यर्थं हिमाचली-राज्यविद्यालयेभ्यः १०, १२ तमं च उत्तीर्णाः एव पात्राः भविष्यन्ति । पुलिसारक्षक-नियुक्त्यर्थं कुलम् १०० अंकाः भविष्यन्ति, यस्मिन् लिखितपरीक्षायाः कृते ९० अंकाः, अभ्यर्थिनः ऊर्ध्वतायाः कृते एकतः षट् अंकाः, भूमिपरीक्षायां उत्तीर्णानां कृते एनसीसी कृते एकतः चत्वारि अंकाः च दत्ताः भविष्यन्ति।

# गतिरोधः समाप्तः, अधुना सर्वकारस्य परामर्शेण भविष्यति कुलपतिनां नियुक्तिः




**हिमसंस्कृतवार्ता- शिमला।** हिमाचलप्रदेशस्य कृषि-उद्यान-विश्वविद्यालयानाम् कुलपति-नियुक्ति-संशोधनविधेयकस्य विषये राजभवनस्य राज्यसर्वकारस्य च मध्ये गतिरोधः समाप्तः अस्ति। अधुना एतयोः विश्वविद्यालययोः कुलपतिनियुक्तिः राज्यसर्वकारस्य परामर्शेण भविष्यति। राज्यपालः शिवप्रतापशुक्लः मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यनेन सह कतिपयदिनानि पूर्वं अस्मिन् विधेयकविषये परामर्शं कृतवान् आसीत्। तदनन्तरं राज्यपालः केनचित् विधिना तदनुमोदितवान् । अधुना राजभवनस्य, विश्वविद्यालयानुदान-आयोगस्य (UGC), भारतीयकृषिसंशोधनपरिषदः (ICAR) च प्रतिनिधिनां अतिरिक्तं नियुक्तेः अनुशंसां कुर्वति समितौ राज्यसर्वकारस्य प्रतिनिधिः अपि भविष्यति। अधुना हिमाचलप्रदेशस्य कृषि-औद्योगिक-वानिकी-विश्वविद्यालय-अधिनियमः १९८६ राज्यस्य विश्वविद्यालयद्वये प्रयोज्यम् अस्ति । एतौ चौधरी-सरवणकुमार-हिमाचलप्रदेश-कृषिविश्वविद्यालयः, पालमपुरम् डॉ. यशवंतसिंहपरमारः उद्यान-एवं-वानिकीविश्वविद्यालयः, सोलनम् स्तः। सुक्खुसर्वकारेण गतवर्षस्य सेप्टेम्बरमासे आयोजिते विधानसभायाः मानसूनसत्रे सदने अस्मिन् विषये विधेयकं पारितं कृतम् आसीत्। विधानसभायां विधेयकस्य पारितस्य अनन्तरं राज्यपालस्य समीपं अनुमोदनार्थं प्रेषितम् । सः तत् स्वस्य पार्श्वे एव स्थापितवान्। राज्यपालः शिवप्रतापशुक्लः मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यनेन सह अस्य विधेयकस्य विषये वार्तालापं कर्तुम् इच्छति स्म । सूत्रानुसारं तौ अधुनैव अस्मिन् विषये चर्चां कृतवन्तौ। तदनन्तरं राज्यपालः शिवप्रतापशुक्लः केनचित् नियमेन तस्य अनुमोदनं कृतवान् अस्ति। शुक्लः स्पष्टीकृतवान् यत् संशोधनानुसारं राज्यसर्वकारस्य प्रतिनिधिं अस्याः समित्याः भागं कृत्वा कोऽपि हानिः नास्ति, परन्तु कृषि-उद्यान-विषये तस्य पृष्ठभूमिः भवेत्, कुलपति-स्तरस्य च भवेत् ।

# ३८ वर्षेभ्यः परं शान्तिमहायागस्य आयोजनं गवासग्रामे प्राप्ताः देवैः सह सहस्रशः खून्दाः

**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।** ३८ वर्षाणाम् अनन्तरं गवासग्रामे देवतागुडारुमहाराजस्य सान्निध्ये ऐतिहासिकदेवसंस्कारः शान्तिमहायागः गावससमारोहः प्रारब्धः। त्रिदिवसीये अस्मिन् ऐतिहासिके महायागे द्वादशाधिकाः देवी-देवताः विंशतिसहस्राधिकसङ्ख्यायां देवलः प्राप्तवन्तः। अस्मिन् काले प्रचलितदेवपरम्परानुसारम् अस्य ऐतिहासिकस्य देवसंस्कारस्य सफलसङ्गठनेन क्षेत्रे सुखसमृद्धिः भविष्यति । शान्तमहायात्रायाः औपचारिकरूपेण प्रचलितस्य दिव्यकारस्य आदेशानां च अन्तर्गतं जनवरी देवागमन-संगेडा इत्यनेन विधिना आरब्धम् । सोमवासरे द्वितीयदिने देवपरम्परानुसारं फेरी, शिखापूजा च सम्पन्नं कर्तव्यम् अस्ति। अन्तिमे तृतीये च दिने देवानां खुन्दानां च विधायेन (उच्छादपच्छादेन) अयं देवसमारोहः समाप्तः भविष्यति।

अस्य महतः दिव्यसंस्कारस्य सफलतायाः अनन्तरं सम्पूर्णेन प्रदेशेन सह देशे विश्वे च शान्ति-समृद्धेः कामनाः भविष्यति। अस्य संस्कारस्य शान्त-आयोजक-समितेः अध्यक्षः करतारसिंह कुल्ला आयोजक-समित्या सर्वविध-तत्परताः सम्पन्नाः इति उक्तवान् । यस्मिन् राज्यसर्वकारस्य निर्देशानुसारं विद्युत्, जलं, मार्गपरिवहनस्य च सेवां सुचारुरूपेण चालयितुं विविधविभागैः सर्वाः सज्जताः सम्पन्नाः सन्ति। अस्मिन् काले विधिव्यवस्थां निर्वाहयितुम् अस्य आयोजनस्य कृते पुलिसविभागस्य पर्याप्तदलानि आगतानि सन्ति।

# अयोध्यायां राममन्दिरं गन्तुं किं किं चिन्तयन्ति हिमाचलीजनाः

## दिव्यहिमाचलस्य सर्वेक्षणे स्वमतं मुक्ततया प्रकटितम्

### ६० प्रतिशतं जनाः अवदन्, अवश्यं गमिष्यन्ति,
### १५ प्रतिशतं जनाः अवदन्, न जानीमः,





**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।** अयोध्यानगर्यां नवनिर्मितस्य राममन्दिरस्य भगवतः रामचन्द्रस्य जीवनस्य अभिषेकस्य विषये देशे सर्वत्र भक्तानां मध्ये अद्भुतः उत्साहः दृश्यते। अयोध्यायां 22 जनवरी दिनाङ्के रामललायाः प्राणप्रतिष्ठायाः आयोजनं भविष्यति। एतद् दिवसं स्मरणीयं कर्तुं सर्वे रामभक्ताः सज्जतायां व्यस्ताः सन्ति। हिमाचलस्य विषये वदन् पर्वतीयराज्ये अस्य कार्यक्रमस्य विषये महतोत्साहः वर्तते। अस्मिन् समये राज्यस्य प्रमुखं मीडियागृहं 'दिव्य-हिमाचलम्' इत्यनेन स्वस्य साप्ताहिकसर्वेक्षणे राममन्दिरस्य विषये जनमतं एकत्रितम्। अस्मिन् 'दिव्य हिमाचलस्य फेसबुक् पृष्ठे, यूट्यूब-दिव्य हिमाचल-जालस्थले च अद्यावधि कुलम् १९९८ जनाः टिप्पणीं कृतवन्तः । सर्वेक्षणं कृतेषु ६० प्रतिशतं जनाः अयोध्यानगरस्य राममन्दिरं द्रष्टुम् इच्छन्ति इति अवदन्। परन्तु अस्मिन् सर्वेक्षणे २५ प्रतिशतं जनाः अयोध्यां न गमिष्यामः इति अवदन् । एतदतिरिक्तं १५ प्रतिशतं जनाः अस्य प्रश्नस्य उत्तरं 'न जानीमः' इति दत्तवन्तः । सर्वेक्षणे अधिकांशं टिप्पण्यः यूट्यूब-चैनेल्-मध्ये प्राप्तानि ।

यावत् वार्ता लिखिता तावत् १३०० जनाः यूट्यूबे टिप्पणीं कृतवन्तः आसन् । दिव्यहिमाचलस्य फेसबुक् पृष्ठे अद्यावधि २६७ जनाः टिप्पणीं कृतवन्तः। 'दिव्यहिमाचलम्' इत्यस्य जालपुटे ४३५ जनाः टिप्पणीं कृतवन्तः । सर्वेक्षणात् स्पष्टतया स्पष्टं भवति यत् सम्पूर्णदेशस्य इव हिमाचलस्य अधिकांशजनाः अयोध्यां गन्तुम् इच्छन्ति। यद्यपि सम्प्रति केवलं चयनिताः पञ्चसहस्रआमन्त्रिताः अतिथयः एव अस्मिन् समारोहे उपस्थिताः भविष्यन्ति, परन्तु तदनन्तरं सर्वैः दर्शनं कर्तुं शक्यते। उल्लेखनीयं यत् 22 जनवरी दिनाङ्के प्राणप्रतिष्ठा कार्यक्रमस्य अनन्तरं श्रीरामजन्मभूमिमन्दिरसहितं सरयूघाटेषु भक्तानां विशालः सम्मर्दः अभिलेखितः भविष्यति। १५ जनवरी दिनाङ्के मकरसंक्रान्तेः शुभ अवसरे अयोध्यायाः ऋषयः, भिक्षवः, भक्ताः, जनाः च माघस्नानस्य अन्तर्गतं पवित्रसरयू इत्यस्मिन् विभिन्नघाटेषु निमज्जनं करिष्यन्ति।

## रेलयानव्यवस्था अपि पश्चात् भविष्यति

यद्यपि चयनिताः अतिथयः 22 जनवरी दिनाङ्के अयोध्यायां उपस्थिताः भविष्यन्ति, परन्तु तदनन्तरं लक्षशः हिमाचलीजनाः अयोध्यायां श्री रामजी इत्यस्य दर्शनं कर्तुं समर्थाः भविष्यन्ति। भाजपा प्रदेशप्रवक्ता राकेशशर्मा इत्यनेन उक्तं यत् आगामिसमये लक्षशः हिमाचलीजनाः रेलमार्गेण अयोध्यानगरीं गमिष्यन्ति। अस्य कृते रेलयानानां व्यवस्था कृता अस्ति ।

## दीपावल्याः वातावरणम् निर्मितम्

सम्पूर्णदेशेन सह जनवरीमासे २२ दिनाङ्के आयोज्यमानस्य कार्यक्रमस्य कृते हिमाचले अपि दीपावलीसदृशं वातावरणं वर्तते। भाजपा मन्दिरेषु बृहत् एलईडी संस्थाप्य कार्यक्रमं दर्शयिष्यति। भाजपा तत्सम्बद्धाः संस्थाः च अस्य सज्जतां कुर्वन्ति। प्रत्येकं गृहे जनाः दीपं प्रज्वालयिष्यन्ति। पुनः हिमाचले उत्सवस्य ऋतोः वातावरणं निर्मितम् अस्ति।

## कन्या-विद्यालये नादौने वार्षिकः समारोहः सम्पन्नः, छात्राभिः रङ्गिणी-कार्यक्रमे हिमाचल-सहितं सम्पूर्ण-भारतस्य संस्कृतेः प्रस्तुतिः प्रस्तुता




**हिमसंस्कृतवार्ताः,नादौनम्।** कस्यापि संस्थायां विद्यालये वा अध्ययनं कुर्वतां बालकानां वार्षिक- क्रियाकलापानाम् सम्मानार्थं प्रोत्साहनार्थं च वार्षिक- पुरस्कार- वितरण- समारोहस्य आयोजनं भवति, येन बालकानां मध्ये उत्साहः तिष्ठति। अस्मिन्नेव क्रमे प्राचार्यायाः मंजू रानी इत्यस्याः अध्यक्षतायां नादौन-नगरस्य राजकीय- उत्कृष्ट- कन्या- वरिष्ठ- माध्यमिक- विद्यालये वार्षिक- पुरस्कार- वितरण- समारोहः महता उत्साहेन आयोजितः। अस्मिन् अवसरे हिमाचलस्य मुख्यमन्त्रिणः ओएसडी डॉ. गोपालगौतमः मुख्यातिथिः रूपेण भागं गृहीतवान् तथा च खण्डकाङ्ग्रेसस्य अध्यक्षः कप्तानः पृथ्वीचन्दः विशेषातिथिरूपेण भागं गृहीतवान्। अस्मिन् अवसरे प्राचार्यया वार्षिकप्रतिवेदनं पठितम्, यस्मिन् मुख्यातिथिं सम्पूर्णवर्षस्य क्रियाकलापस्य विषये सूचितम्। सा अवदत् यत् अस्मिन् वर्षे विद्यालयस्य छात्राः समूहगायनम्, श्लोक-पाठः, मन्त्रपाठः, संस्कृतगीतिका, वॉलीबॉल इत्यादिषु विविधेषु कार्येषु हिमाचले प्रथमस्थाने स्थिताः आसन्। हिमाचलस्य संस्कृति-सहितं सम्पूर्ण-भारतस्य संस्कृतिः छात्रैः प्रस्तुता। अस्मिन् कालखण्डे विभिन्नराज्येभ्यः विद्यालये अध्ययनं कुर्वतीभिः बालिकाछात्रैः स्वस्वराज्यस्य प्रस्तुतिः प्रस्तुता, येषु पंजाबी, हरियाणवी, राजस्थानी, भोजपुरी, बंगाली इत्यादीनां प्रस्तुतिः प्रमुखा आसीत्। अस्मिन् अवसरे मुख्यातिथिः बालिका-छात्राणां उपलब्धीनां अभिनन्दनं कृत्वा अवदत् यत् अद्य कन्यानां युगः अस्ति तथा च पुत्र्याः कार्ये प्रत्येकस्मिन् कार्ये पुत्राणाम् न्यूनाः न सन्ति। कन्यानां कृते अपि सर्वकारः निरन्तरम् उत्तमं कार्यं कुर्वन् अस्ति। अवसरेऽस्मिन् कमल कम्मी, रीना देवी, डिम्पल-कटोचः, रमेश-कुमारः, नानक-चंदः, एसएमसी अध्यक्षः रिंकू शर्मा, संतोष-संधू, नरेन्द्र-सोनी, बलदेव-चौधरी, सरदारी-लालः, प्राचार्यः दिले-मोहम्मदः, एमडी अशोक-शर्मा, सेवानिवृत्त-प्राचार्यः सतीश-शर्मा इत्यादयः गणमान्यजनाः उपस्थिताः आसन्।

## 'भूल भूलैया 3' चलचित्रे कदाचिद् विद्या बालनः दृश्यते




हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।

'भूल भुलैया फ्रेंचाइज' इत्यस्य तृतीयं चलचित्रं 'भूल भुलैया ३' अद्यकाले वार्तायां वर्तते। अस्य चलचित्रस्य चित्रोतलनं शीघ्रमेव आरम्भः भविष्यति। चित्रोतलनम् आरम्भात् पूर्वं चलचित्रस्य तारकवर्गविषये निरन्तरं वार्ता आगच्छन्ति। अद्यैव वार्ता आगता यत् तब्बू मञ्जुलिका इत्यस्य भूमिकां कर्तुं न अस्वीकृतवती। तब्बू 'भूलभुलैया २' इत्यस्मिन् मञ्जुलिका इत्यस्य भूमिकायां दृष्टा। परन्तु सा 'भूलभुलैया ३' इत्यस्मिन् एतत् पात्रं कर्तुं न अस्वीकृतवती। प्राप्तसमाचारानुसारं तब्बू इत्यस्याः मञ्जुलिकायाः चरित्रं रोचते किन्तु सा सम्प्रति एतत् पात्रं कर्तुम् इच्छति एव नास्ति। तब्बू इत्यस्याः अस्वीकारस्य अनन्तरं वार्ता आगच्छति यत् इदानीम् एषा भूमिकां विद्याबालनः करिष्यति। विद्या भूलभुलैया इत्यस्मिन् मंजुलिकायाः पात्रं निर्वहति स्म। अधुना च सा पुनः ३ मध्ये अस्ति। प्राप्तसमाचारानुसारं विद्या स्वस्य पुनरागमनेन अतीव प्रसन्ना अस्ति। परन्तु विद्याबलनस्य पुनरागमने अद्यापि आधिकारिकं वक्तव्यं न आगतम्। 'भूल भुलैया ३' इत्यस्मिन् चलचित्रे कार्तिक आर्यनः मुख्यभूमिकायां दर्शनं दास्यति। कार्तिकस्य विरुद्धं नायिका का भविष्यति इति अद्यापि न प्रकाशितम्। 'भूल भुलैया 2' चलचित्रे कार्तिकेन सह कियारा आडवाणी आसीत्। परन्तु 'भूल भुलैया 3' चलचित्रमध्ये सा दृश्यते वा न वा इति न प्रकाशितम्।

## संस्कृतभारती हरियाणाराज्यस्य प्रबोधनवर्गेषु १०८ वर्गार्थिनः भागं गृह्णन्ति- डॉ. नवीन शर्मा



हरियाणाराज्ये संस्कृतभारतीद्वारा गुरुग्रामे कैथले च वर्गद्वयस्य आयोजनं क्रियते। गुरुग्रामे 44, कैथले 64 वर्गार्थिनः भागं गृह्णन्ति। आहत्य छात्रशिक्षकप्रबन्धकानां संख्या 145 वर्तते। वर्गेषु प्रातः आरभ्य सायं यावत् संस्कृतमयं वातावरणं भवति। सर्वे वर्गार्थिनः संस्कृतसम्भाषणस्य अभ्यासं कुर्वन्तः सन्ति। संस्कृताभ्यासेन भाषाभ्यासः एव न भवति अपितु वर्गार्थिनां सर्वांगीण विकासो भवति। यतो हि प्रातः नित्यकर्म आरभ्य दिनचर्यायाः अनुसारं सर्वाणि सत्राणि जायन्ते। सर्वेषां वर्गार्थिनां समयेन जागरणं भवति,कक्षायमपि समयसारिण्यनुसारमेव उपस्थिताः भूत्वा पठन्तः सन्ति। रटनाभ्यासं कुर्वन्तः सर्वेषां आत्मबलं सुदृढं भवति। साहित्यलेखनाभ्यासोऽपि जायते यस्मात् संस्कृत- लेखनाभ्यासः जायते। एतेषां वर्गाणाम् उद्देश्यं धाराप्रवाहरूपेण संस्कृतसम्भाषणं कर्तुं वर्गार्थिनः समर्थाः भवन्तु एवं संस्कृतस्य संरक्षणं संवर्धनं च भवतु इति वर्तते।वर्गेषु सत्येन्द्रः, बलजिन्द्रः, राजेशः, राहुलः, सुनीलः, रजनी इत्यादयः प्रशिक्षकरूपेण कार्यं कुर्वन्ति।

## हरियाणायां कैथले भविष्यति जनपदसम्मेलनम्- सुनील आत्रेयः

कैथलजनपदसंयोजकेन सुनील आत्रेयवर्येण उक्तं यत् 12 जनवरी 2024 तमे दिनांके शुक्रवासरे कैथले जनपदसम्मेलनं भविष्यति। यस्मिन् कैथलजनपदस्य संस्कृतप्रेमिणः विविधसंस्थाः, संस्कृताध्यापकाः, प्राध्यापकाश्च भागग्रहणं करिष्यन्ति। जिलासंयोजकेन सुनीलवर्येण उक्तं यत् हरियाणायां संस्कृतसंरक्षणार्थं संवर्धनार्थं च योजनानिर्माणं भविष्यति। सम्मेलने संस्कृतभारती उत्तरक्षेत्रस्य संघटनमन्त्री नरेन्द्रवर्यः, हरियाणाप्रान्तस्य न्यासाध्यक्षः डॉ. रामनिवासशर्मा, प्रान्ताध्यक्षः डॉ. सोमेश्वरदत्तः, प्रान्तमन्त्री प्रमोदः, सहमन्त्रिणौ ईशमसिंहः भूपेन्द्रश्च, साहित्यप्रमुखः पुष्पेन्द्रः, विभागसंयोजकः डॉ. विनय गोपाल त्रिपाठी, पत्राचारप्रमुखः डॉ. शीतांशु त्रिपाठी इत्यादयः प्रान्तगणस्य कार्यकर्तारः अपि सम्मिलिः भविष्यन्ति।

## चेन्नैनगरे वैश्विक- निवेशक- सम्मेलनस्य उद्घाटनं कृतवान् पीयूषगोयलः




चेन्नैनगरे दिनद्वयात्मकस्य वैश्विक- निवेशक- सम्मेलनस्य प्रारम्भः अभवत्। केन्द्रीय- वाणिज्योद्योगमन्त्री पीयूषगोयलः सम्मेलनम् उद्घाटितवान्। एतस्मिन् उपवेशने जर्मनी- डेनमार्क- सिंगापुर- दक्षिणकोरिया- जापान- फ्रांस- आस्ट्रेलिया- ब्रिटेनदेशाः सहभागिनो भविष्यन्ति। वाणिज्यमन्त्री गोयलः चेन्नैनगरे अनेकेषु स्थानेषु विकसित- भारत- सङ्कल्प- यात्रायां भागं भजिष्यति।

## संस्कृतभारत्याः सम्भाषणशिबिरान्दोलनेन दशकोटिजनाः संस्कृतेन वक्तुं समर्थाः ,27 देशेषु संस्कृतकार्यम्



ज्ञानं नास्ति तदपि श्रवणेन भाषणेन च संस्कृतभाषा आयाति- राकेशशर्मा"उत्तराखण्डे। उत्तरकाश्याः जायमाने प्रबोधनवर्गे तृतीयदिवसे श्रीराकेशशर्ममहोदयः सम्भाषणकौशलं शिक्षितवान् । तेनोक्तं यत् तरणं यथा सहजतया जायते मशकमारणं यथा सहजतया जायते तथैव सम्भाषणम् अपि सहजतया जायते । पुस्तकपठनेन एव भाषा न आयाति । भाष्यते इति भाषा । भाषा यद्यपि प्रथमावसरे न आयाति परन्तु अभ्यासद्वारा भाषा आयाति । यदा वयं भाषाकथनस्य प्रयासं कुर्मः तदा अस्माकं मुखे भाषा आयाति अतः यदि वयं प्रतिदिनं संस्कृतं वदामः अभ्यासं कुर्मः तदा सम्यक्तया संस्कृतं वयं वक्तुं समर्थाः । तैः प्रोक्तं यत् ज्ञानम् नास्ति तदपि श्रवणेन भाषणेन च संस्कृतभाषा आयाति । तथा च भाषणेन पठनेन लेखनेन अपि भाषाकौशलम् इतोपि वर्धते । नियमज्ञानम् अस्ति परञ्च प्रयोगः नास्ति तु भाषा नायाति । चतुर्थदिवसे प्रान्तमन्त्री श्रीगिरीशतिवारी सम्भाषिणार्थिनाम् सम्बोधितवान् तैः शिक्षणाभ्यासे बहूनाम् सम्भाषणं वर्धितं। अवसरेस्मिन् तिवारीवर्येण उक्तं यत् संस्कृतभारत्याः इदानीं उत्तराखण्डे वर्गद्वयं प्रचलति । एकः प्रबोधनवर्गः कूर्मविभागान्तर्गतं हल्द्वान्यां प्रचलति । द्वितीयः गढ़वालविभागान्तर्गतम् उत्तरकाश्यां प्रचलति। वर्गद्वये सर्वेपि शैत्यकाले गृहं परित्यज्य आवासीयसंस्कृतवर्गे संस्कृतेन वदन्ति। तैः प्रोक्तं यत् वयम् एवम्प्रकारेण संस्कृतं प्रतिदिनं वदामः तु अन्येपि संस्कृतं वक्तुं शक्नुवन्ति । संस्कृतं सम्भाषणेन एव जीवितः, रक्षितः च भविष्यति । अद्य संस्कृतभारत्याः शिविरान्दोलनेन दशकोटिजनाः संस्कृतेन वक्तुं समर्थाः सन्ति । अत्र कार्यकर्तॄणां समर्पणं कार्यं च सदैव भवति तेन अद्य देशे विदेशेपि संस्कृतकार्यं जायमानम् अस्ति , विदेशे अपि संस्कृतं वक्तुं जनाः समर्थाः अभवन् । 27 देशेषु संस्कृतभारत्याः कार्यं जायमानम् वर्तते । प्रान्तसंगठनमन्त्री श्रीगौरवशास्त्री संस्कृतप्रचारमभिलक्ष्य उक्तवान् यत् आधुनिकसमये वयं सर्वे भारतस्य गौरवं संस्कृतेन वर्धयामः । वर्गेस्मिन् राधेश्यामखण्डूरी, च वर्गाधिकारी , सर्वव्यवस्थाप्रमुखः डॉ. द्वारिकाप्रसादनौटियालः शिक्षकः कुलदीपमैन्दोला, डॉ. प्रदीपसेमवालः, डॉ. अनिलबहुगुणा, शुभमः, शिवानी , नरेशभट्टः, अभिषेकः , दातारामपुर्वालः च आदयः कार्यकर्तारः उपस्थिताः आसन् ।

## ।। श्रीरामायणकथा ।।





हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

### लङ्काकाण्डम्! (सप्तपञ्चाशत्तमः सर्गः) राघवस्य समीपे जानक्याः आनयनम्

महाप्राज्ञः हनुमान् सर्वधनुष्मतां वरं कमलपत्राक्षं रामम् अब्रवीत् हे प्रभो! यान्निमित्तं भवान् महत् युद्धं कृत्वा विजयं प्राप्नोत् तां शोकसन्तप्तां देवीं मैथिलीं द्रष्टुम् अर्हति। सा वाष्पपर्याकुलेक्षणा शोकसमाविष्टा मैथिली भवतः विजयं श्रुत्वा भवन्तं द्रष्टुम् अभिकाङ्क्षति। हनुमता एवमुक्तः धर्मभृतां वरः ईषत् वाष्पपरिप्लुतः श्रीरामः सहसा ध्यानं गत्वा मेदिनीम् अवलोकयन् दीर्घम् उष्णं निश्वस्य उपस्थितं मेघसङ्काशं विभीषणम् अब्रवीत् हे राक्षसेश्वर! वैदेहीं शिरःस्नानं कारयित्वा दिव्याङ्गरागैः दिव्याभरणभूषणैः शीघ्रम् इह उपस्थापयतु। रामेण एवमुक्तः त्वरमाणः विभीषणः अन्तःपुरं प्रविश्य स्त्रीभिः सीतां प्राचोदयत्।

ततः विभीषणः स्वयं तत्र गत्वा सीतां दृष्ट्वा विनीतस्वरेण अब्रवीत् हे देवि! भवती स्नानं कृत्वा दिव्याभरणभूषणैः भूषिता भूत्वा शीघ्रं शिबिकाम् आरोहतु। प्रभुः भवतीं द्रष्टुम् इच्छति। एवमुक्ता सा सीता विभीषणं प्रत्यवदत् हे राक्षसेश्वर! अहम् अस्नात्वा हि भर्तारं द्रष्टुम् इच्छामि। तस्याः तद् वचनं श्रुत्वा विभीषणः प्रत्यवदत् हे देवि! भवत्याः पतिः रामः यथा अवदत् तथा कुर्यात्। विभीषणस्य तद् वचनं श्रुत्वा भर्तृभक्त्यावृता साध्वी सीता तदा तथैव भवतु इति प्रत्यवदत्। ततः शिरःस्नातां दिव्याभरणभूषितां तां सीतां शिबिकायाम् आरोप्य राक्षसैः आनाययत्। राक्षसेश्वरः विभीषणः अग्रे अग्रे गत्वा सीतागमनस्य संवादं श्रीरामाय न्यवेदयत्।

राक्षसगृहचिरोषितां ताम् आगतां सीतां श्रुत्वा शत्रुहा राघवः रोषं हर्षं दैन्यं च प्राप्नोत्। ततः किञ्चिद् विचार्य अहृष्टः राघवः विभीषणम् इदं वाक्यम् अब्रवीत् हे सौम्य राक्षसाधिप! मत्समीपं क्षिप्रम् आगन्तुं भवान् वैदेहीं सूचयतु। विभीषणेन उक्ता सा शिबिकाम् अवरुह्य ततः विभीषणम् अनुगता सीता शनैः शनै श्रीरामम् अभ्यवर्तत। भर्तुः समीपं गत्वा सा विस्मयात् प्रहर्षात् स्नेहाच्च तस्य सौम्यं मुखं पश्यति स्म। चिरात् प्रियस्य उदितपूर्णचन्द्रकान्तं मुखं दृष्ट्वा सीतायाः मनःक्लेशः अपगतः।

## शुश्रुतमुनिः भारतीयः प्रथमः शल्यचिकित्सकः



भारतं ज्ञानस्य आकरभूतं वर्तते अखिलविश्वे । अत्रैव परमदार्शनिकाः, परमविज्ञानिनः, परमचिकित्साविदः, परमराजनीतिविदः, परमतत्त्वज्ञानविदः च सञ्जाताः सन्ति युगे युगे । वस्तुतः भारतं हि अखिलविश्वस्य सर्वेषां परमगुरुत्वेन मार्गदर्शकत्वेन वा पूर्वतः हि सम्यक् परिचिन्वन्ति विश्ववासिनः, नात्र संशयः ।

अस्माकं भारतदेशे आयुर्वेदचिकित्सापद्धतिः अतीव पुरातनी । प्रत्युत वेदे अपि आयुर्वेद-चिकित्सासम्बद्धम् उल्लेखनं प्राप्यते । पुराकाले आयुर्वेदचिकित्सा व्यक्तिविशेषाणां मध्ये हि आबद्धा आसीत् । एतच्चिकित्सायाः गुणागुणविषये तावान् प्रचारः नासीत् ; यतोहि इयं चिकित्सा परिवारस्य मध्ये हि सीमाबद्धा आसीत्, इत्यतः प्रायशः जनाः हि एतद्विषये सम्यक् नावगच्छन्, अतः इयं चिकित्सापद्धतिः शनैः लुप्तप्राया इव जाता ।

प्रकाशित-तथ्यानुसारमत्र उल्लेखितुं शक्यते यत् आयुर्वेदशास्त्राणां मध्ये 'चरकसंहिता', 'शुश्रुतसंहिता' चेति ग्रन्थद्वयम् अत्यन्तं पुरातनम्, अमूल्यं चिकित्सारत्नञ्च वर्तते । संस्कृतभाषया लिखितस्य एतस्य ग्रन्थद्वयस्य विषये पाश्चात्यपण्डितस्य चारटनस्य मतं यत् - 'अस्त्रोपचारस्य व्यावहारिकं विज्ञानं सर्वप्रथमं शुश्रुतेन हि प्रवर्तितमासीत्' इति । 'श्रुश्रुत-तन्त्रः' शुश्रूतेन हि लिखितः ग्रन्थोऽस्ति । कालान्तरे नागार्जुनादिपण्डिताः एतं ग्रन्थं यथासाध्यं संशोधितवन्तः आसन् ।

नानापण्डितानां मतानुसारं शुश्रुतः न षष्ठशतिकायाः अनन्तरं प्रादुर्भूतः, अपितु धन्वन्तरिकालिकः आसीत् सः इति । अतः शुश्रुतः धन्वन्तरेः शिष्यः आसीत् । एकतः आयुर्वेदशास्त्रस्य अस्त्रोपचारपद्धतिः (Surgery) धन्वन्तरि-शुश्रुतयोः हि अवदानभूता वर्तते ; अपरतश्च भेषजविषयः (Medicine) आत्रेय-भरद्वाजयोः हस्ते विकासताम् अगच्छत् ।

✍असमप्रदेशीयः, नारदोपाध्यायः

शुश्रुतः स्वकृतिग्रन्थे अस्त्रोपचारस्य प्रकाराः अष्टविधाः इति उल्लेखनं कृतवान् अस्ति । ते - छेदनं, भेदनं, वेदनं, लेखनम्, ईशानम्, आहरणं, श्रावणं, सीवनं चेति । अत्र प्रत्येकं पद्धतिप्रकाराः महत्त्वभूताः ।

अस्त्रोपचाराय शुश्रुतः १२५ विधानि उपकरणानि व्यवहृतवान् आसीत् । अस्त्रोपचारात् पूर्वं वैद्येन रोगिणः हस्तम् आदाय स्नायुःपरीक्षापूर्वकं तस्य स्वास्थ्यसम्बद्धम् अभिज्ञानं प्राप्य च पथ्यापथ्यादिविषयकः दृढनियमः तत्कृते विहितः आसीत् । अस्त्रोपचारात् पूर्वम् आहारग्रहणं निषिद्धं कृतमासीत् । सामान्यरोगश्चेत् लघ्वाहारग्रहणस्य अनुमतिः प्रदत्ता आसीत् । शुश्रुतः अस्त्रोपचारात् किञ्चित्पूर्वं धूप-निमपत्र-सर्षपादिभिः चिकित्साप्रकोष्ठस्य निर्विजीकरणविषये युक्तिम् प्रादर्शयत् । अद्य एकविंशति-शतिकायाः आधुनिक-चिकित्साविज्ञाने अपि शुश्रुतमतस्यैव पुष्टिं कृत्वा अस्त्रोपचारप्रकोष्ठस्य निर्विजीकरणं (Sterile) विधीयते ।

शुश्रुतेन अस्त्रोपचारार्थं कानिचन अत्यन्तं तीक्ष्णोपकरणानि व्यवहृतानि आसन्, यैः च कश्चन केशोऽपि उलम्बत्वेन द्विधा विभक्तुं शक्यते स्म । तानि उपकरणानि च अस्त्रोपचारात्पूर्वम् उष्णजले निमज्ज्य स्थापितानि भवेयुः, जीवाणुमुक्त्यर्थम् । भिन्नभिन्नास्त्रोपचाराय पृथक्पृथक् उपकरणानि व्यवहृतानि आसन् । सः हि सर्वप्रथमतया एकत्रस्थ शरीरमांसं विच्छिद्य, तच्छरीरस्य अपरभागे पूरयित्वा च रोगिणे आरोग्यं प्रदत्तवानासीत् । अतः शुश्रुतः आधुनिक-'प्लाष्टिक-सार्जारी' इत्यस्य अपि जनकः कथ्यते । अद्य शल्यचिकित्सार्थं वैद्याः यादृशानि अस्त्राणि व्यवहरेयुः, तानि शुश्रुतः षष्ठशतिकायां हि आविष्कृतवान् आसीत् । अद्य एकविंशति-शतिकायां प्रयुक्तिविद्यायाः साहाय्येन अस्त्रोपचारस्य कृते नूतनतया आवश्यकानि साधनानि सूक्ष्मरूपेण निर्मितानि स्युः ।

अतः चिकित्साविज्ञाने अस्त्रोपचारक्षेत्रे वा शुश्रुतः महान् जनकः इति तु स्वीकार्यमेव । एतादृशः महान् चिकित्सकः षष्ठशतिकायां हि भारते अस्त्रोपचारपद्धतिम् आरब्धवान् यत् तत् अत्यन्तं गौरवस्य विषयः, अनेन वयं नितरां गौरवान्विताः । शुश्रुतमुनेः एतद् अवदानम् अभूतपूर्वम् । सः महतः स्वकीयावदानकारणतः अखिलजगति चिरस्मरणीयः, प्रातस्मरणीयश्च सन् सदा सन्तिष्ठते इति, शम् ।

## कोऽहम्-४



**१३) जगद्वस्तूनां संस्काराः तज्जन्यविचाराश्च सामुद्रवीचिवत् सातत्येन उद्भवन्ति। तेषां नाशः कदा सम्भवेत्?**

यदा यदा आत्मविचारणा प्रवर्धेत तदा तदा विचाराणां नाशः भवेत्।

**१४) जगद्वस्तूनां संस्काराः अनादिकालात् प्रवृत्ताः। तेषां नाशः तथा च स्वस्य केवलं आत्मत्वेन स्थानं किं यथार्थतया शक्यम्?**

"एतत् शक्यं भवेत् किम् ?" एतादृशान् सर्वान् संशयान् परित्यज्य जनः आत्मनः विषये सातत्येन विचारणां कुर्यात्। यद्यपि कश्चन पापिभ्यः अपि पापियान् स्यात् नाम तथापि सः " अहं तु पापिष्ठः अस्मि।" एतादृशं विचार्य चिन्ताकुलः मा भवेत् ; प्रत्युत सः यदि आत्मविचारणां तीव्रतया करोति चेत् सः सफलः भवेत् एव।

एकस्यैव जनस्य मनः एकं सुष्टम् अपरं दुष्टं च इति द्विविधं न भवति। तत्तु एकमेव। तस्मिन् ये संस्काराः ते पवित्राः अपवित्राः वा। यदा सत्संस्काराः प्रबलाः तदा तत् सुष्टम् इति कथ्यते यदा च कुसंस्काराणां प्राबल्यं तदा तदेव दुष्टम् इति। मनसे जगद्वस्तूनि प्रति गमनार्थं अन्यजनसम्बद्धेषु विषयेषु विचरणार्थं वा न अनुमतिः न दातव्या। अन्ये जनाः कियत् अपि दुष्टाः स्युः नाम जनः तान् प्रति द्वेषं न पालयेत्। रागद्वेषौ उभावपि परिहर्तव्यौ। यत् अन्येभ्यः दीयते तत् सर्वं स्वस्मै एव कृतं दानम्। यदि एतत्सत्यम् अवगम्येत तर्हि कः अन्यस्मै न दद्यात्? यदा स्वस्य मनसः उदयः भवति तदा सर्वमपि उदयं याति। यदा स्वस्य मनसः शमनं भवति तदा सर्वमपि शान्तिं गच्छति।

यावत्प्रमाणेन वयं विनयेन वर्तामहे तावत्प्रमाणेन तस्य शुभपरिणामः भवेत्। यदि मनः शमनं यायात् तर्हि मनुष्यः कस्मिन्नपि स्थले वासं कर्तुं प्रभवेत्।

**१५) आत्मविचारस्य अभ्यासः कियत्कालं कर्तव्यः?**

यावत् जगद्वस्तूनां संस्काराः मनसि विद्यन्ते तावत् कोऽहम् इत्येवंरूपा आत्मविचारणा आवश्यकी । यथा यथा विचाराः उद्भवेयुः तथा तथा अनुक्षणमेव तेषामुद्गमस्थले तेषां हननं करणीयम्। यदि कश्चन एवं सातत्येन आत्मसाक्षात्कारं यावत् आत्मानुसन्धानं कुर्यात् तर्हि तदेव निश्चयेन कार्यसाधकं भवेत्। यावत् दुर्गे शत्रवः विद्यन्ते तावत् ते सन्ततम् अभिघाताय धाटीं विदध्युः। यदा यदा ते बहिरागच्छन्ति तदा तदा यदि तान् मारयामः तर्हि दुर्गः अस्माकम् आधीन्ये भवेत्।

**१६) आत्मनः स्वरूपं किम्?**

यथार्थतया यत् विद्यमानं तत् केवलं आत्मैव। जीवाः, जगत् , ईश्वरः चैते त्रयः तस्मिन्नात्मन्येव शुक्तौ रजतमिव भासमानाः भवन्ति। एते त्रयः एककालमेव भासन्ते एककालमेव लयं गच्छन्ति। आत्मा तदेव यत्र "अहम्" इति विचारस्य अवशेषः अपि न विद्यते। तदेव "मौनम्" इति कथ्यते। आत्मैव सर्वं जगत्।एषः "अहम्" अपि सः एव। सः एव ईश्वरः। सर्वमेव आत्मरूपं शिवरूपं वा।

**१७) सर्वमपि ईश्वरस्य कर्म अस्ति ननु?**

इच्छां विना सङ्कल्पं विना अथवा प्रयत्नं विना सूर्यः उदेति। तस्य केवलास्तित्त्वेनैव सूर्यकान्तमणिः अग्निं वमति, कमलं विकसति, जलं बाष्पीभवति, जनाः स्वस्वकार्याणि कुर्वन्ति ततश्च विश्राम्यन्ति। यथा अयस्कान्तस्य केवलम् उपस्थित्या एव सूच्यः तं प्रति आकृष्टाः भवन्ति तथा केवलम् ईश्वरस्य अस्तित्वेनैव त्रिभिर्गुणैः सत्वरजस्तमोरूपैः अथवा पञ्चभिः दिव्यकार्यैः उत्पत्ति-स्थिति-विनाश-तिरोधान -अनुग्रहैः नियन्त्रिताः जीवाः स्वस्य प्रारब्धानुसारं स्वकर्माणि सम्पादयन्ति ततश्च विश्राम्यन्ति। ईश्वरः सङ्कल्परहितः अतः किमपि कर्म तस्मिन् न श्लिष्यते यथा जगतः कर्माणि सूर्ये परिणामं न जनयन्ति अथवा आकाशः यथा अन्येषां चतुर्णां महाभूतानां गुणैः दोषैर्वा लिप्तं न भवति।

**१८) भक्तेषु कः सर्वोत्तमः?**

यः आत्मरूपाय ईश्वराय सर्वस्वं समर्पयति सः ईश्वरस्य सर्वोत्तमः भक्तः। अत्र ईश्वराय समर्पणं नाम अन्यान् सर्वान् विचारान् अपास्य केवलम् आत्मविचारपरायणः भूत्वा स्थानम्।

ईश्वरे यः कश्चित् भारः समर्प्यते, तं भारम् ईश्वरः आनन्देन वहति। यतः ईश्वरस्य महाशक्तिः एव सर्वं जगत् चालयति, तां शरणम् अगत्वा 'किं करणीयम्? किं न करणीयम्? कथं करणीयम्? कथं न करणीयम्?' एतादृशैः विचारैः अस्माभिः किमर्थं सततं चिन्ताकुलैः भवितव्यम्?

वयं तु जानीमः यत् रेलयानं सर्वमपि भारं वहत् अस्ति। तर्हि रेलयाने प्रवेशात् अनन्तरं किमर्थं वयं स्वीयं लघुभारं रेलयानभूमौ स्थापयित्वा सुखेन उपवेशनं विहाय, तत् भारं स्वस्य शिरसि एव वहन्तः कष्टम् अनुभवामः?

श्री.अभिजित् तोडकरः
सुभाषितशिक्षणप्रमुखः
संस्कृतभारती, पश्चिममहाराष्ट्रप्रान्तः

## नागरिकोड्डयन- महानिदेशालयेन विमानानाम् आपात्कालिक- निगर्मन- द्वाराणाम् शीघ्र- निरीक्षणस्य निर्देशः प्रख्यापितः




नागरिकोड्डयन- महानिदेशालयेन अमेरिकायाम् विमानस्य आपात्कालिकावतरणस्य घटनान्तरं स्वदेशि- विमान- समवायेभ्यः सर्वेषां बोइंग 737'8 मैक्स इत्याख्यानां विमानानाम् आपात्कालिक- निगर्मन- द्वाराणाम् शीघ्र- निरीक्षणस्य निर्देशः प्रख्यापितः। महानिदेशालयेन अलास्का- एयरलाइन्स इति नामधेयकस्य विमानस्य बोइंग 737 मैक्स 9 इत्येतस्य घटनां निध्याय अयं दिशानिर्देशः प्रसारितः। अवधेयं वर्तते यत् गतशुक्रवासरे अलास्का इति समवायस्य विमानस्य वातायनम् समेत्य बाह्यभागः उड्डयन- समये वायौ पतितः, येन कारणेन आपात्कालिक- रूपेण संयुक्तराष्ट्रस्य पोर्टलैण्ड इत्यत्र जातम्। सम्प्रति, एयर इण्डिया- एक्सप्रेस, स्पाइसजेट आकाश- विमानसेवानां समूहे 737-8 इति मैक्स- विमानानि सम्मिलितानि